## ६७. कार्यक्रमः

करोतेः -प्रयोगः

प्रमुखः - अद्य कार्यक्रमः कथं भोः । कः कः किं किं करोति इति वदतु ।

विशालः - आगच्छतु वदामि ।

छात्राः - नमस्कारः श्रीमन् ।

विशालः - नमस्कारः । उपविशन्तु । एषा मधुरा, एषा अद्य प्रार्थनां गायति । एतस्याः माता वीणां वादयति ।

प्रमुखः - कार्यक्रमस्य निर्वहणं कः करोति.... ?

विशालः - कार्यक्रमस्य निर्वहणं विशालः करोति । एषः पञ्चमकक्ष्यायां पठति । स्वानुभवं पद्मश्री वदति । सा एतस्याः कक्ष्यायाः प्रमुखा । प्रास्ताविकं भवान् वदतु ।

प्रमुखः - किं वदामि भोः....... । अस्तु चिन्तयामि । भवान् अपि सिद्धः भवतु ।

विशालः - एतौ द्वौ दूरवाणी-सम्भाषणं कुरुतः । एते द्वे बालिके विज्ञापिकां कुरुतः । सः राजेशः एकपात्राभिनयं करोति । तौ किं कुरुतः इति न जानामि ।

प्रमुखः - पृच्छतु भोः भवन्तौ किं कुरुतः ?

वीरकः - आवां एकं ऐन्द्रजालं प्रदर्शयावः ।

नन्दीशः - मम मित्रं वन्दनार्पणं करोति ।

प्रमुखः - भवतु । सर्वे मिलित्वा कार्यक्रमस्य यशस्विता यथा स्यात् तथा कुर्वन्तु ।